दिनाङ्क :- 14.03.2026

प्रात: - 06:55

<u>प्रधानमंत्री असम</u>

प्रधानमन्त्री नरेन्द्रमोदी पुनः दृढीकृतवान् यत् भाजपा-नेतृत्वे एन्. डी. ए- प्रशासनं कृषकाणां कल्याणाय समर्पितः अस्ति, तेषां आयं वर्धयितुं, देशस्य कृषिक्षेत्राणां आधुनिकीकरणाय च उपक्रमान् प्राधान्यम् अददात्। गुवाहाटी-नगरे जनसभाम् सम्बोधयन्, सम्पूर्णे देशे द्वात्रिंशत्तदशमलवोत्तर नव कोट्यधिकेभ्यः कृषकेभ्यः पी एम्-किसान् योजनायाः द्वाविंशतितमं देयराशेः विमोचनानन्तरं, कार्यक्रमं सम्बोधयन् श्रीमोदिना उक्तं यत् गत एकादश वर्षेषु भाजपा-नेतृत्वे प्रशासनेन कृषकाणां आयं वर्धयितुं नैके उपायाः कृताः सन्ति।

असम-यात्रायाः द्वितीये दिने प्रधानमन्त्री अद्य सिलचर-नगरं गत्वा प्रायः सार्द्ध त्रयोविंशतिसहस्र कोटिरूप्यकाणां विविधपरियोजनानां शिलान्यासं लोकार्पणं च करिष्यति। अद्य अपराह्णे प्रधानमन्त्री कोलकाता-नगरं आगत्य प्रायः सार्द्धअष्टादश-सहस्र कोटि-रूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम्, शिलान्यासं च करिष्यति। सः प्रायः सप्तदशसहस्र कोटिरूप्यकाणां भारतीय-राष्ट्रिय-राजमार्ग-प्राधिकरणस्य राजमार्ग-परियोजनानां उद्घाटनं करिष्यति, प्रमुख-नौकाश्रय-मूलसौकर्याणां शिलान्यासं च विधास्यति।

<u>लोकसभा अनुपूरक-अनुदान</u>

लोकसभायां पञ्चविंशत्यधिक-द्विसहस्र, षड्विंशत्यधिक -द्विसहस्र -वर्षयोः अनुपूरक-अनुदानं स्वीकृतम्। अस्य अन्तर्गतं सर्वकारेण एकाशीति-सहस्राधिक-द्विलक्ष-कोटिरूप्यकाणां स्थूल-अतिरिक्त-व्ययं याचितम्। अस्य अतिरिक्त-व्ययस्य अनुमतिः मुख्यतया उर्वरकस्य, खाद्य-अनुदानस्य, रक्षा-सेवायाः च उपरि अधिकव्ययं पूरयितुं भविष्यति। लोकसभायां विनियोग-विधेयकम् षड्विंशत्यधिक द्विसहस्रम् अपि स्वीकृतम्।

<u>इरान्- राजदूतः</u>

भारते इरान्-देशस्य राजदूतः मोहम्मद फतली इत्येषः सूचितवान् यत् भारतं शीघ्रमेव होर्मुज़्-जलसंधिना सुरक्षितमार्गं प्राप्तुं शक्नोति इति। ह्यः नवदिल्ल्यां प्रसारमाध्यमेन सह वार्तालापं कुर्वन् राजदूतः फतली अवदत् यत् भारतं इरान्-देशस्य मित्रम् अस्ति। श्रीफतली अस्मिन् विषये आशां प्रकटितवान् यत् इरान्-देशः भारतीयानां नौकायनानि गन्तुं अनुमन्यते । अत्रान्तरे, केन्द्रीय-पेट्रोलियम-प्राकृतिक-गैस्-मन्त्रालयस्य संयुक्तसचिवः सुजाता शर्मा इत्येषा अवोचत् यत् भारतं पेट्रोल्-डीज़ल्- इत्येतयोः उत्पादने आत्मनिर्भरम् अस्ति।

विकसित-भारत

विकसित-भारत-युव-सम्पर्क-कार्यक्रमः राष्ट्रिय-राजधान्यां बहुविध-शैक्षणिक-संस्थासु सार्धैक-सहस्रतोप्यधिकान् छात्रान् नियोजिवान्। युवा-कार्य-क्रीडा-मन्त्रालयः ह्यः अवदत् यत् संवादात्मक-सत्राणि राष्ट्रनिर्माणस्य युवा-सहभागित्वस्य विषये, विकसित Bharat@2047 इत्यस्य दूरदृष्टेः विषये च केन्द्रितानि आसन्।

युवसङ्गम्

युवसङ्गम् इत्यस्य षष्ठं चरणस्य कृते पञ्जीकरणम् अधुना उद्घाटितम् अस्ति। शिक्षा-मन्त्रालयः एकभारत् श्रेष्ठभारत् इत्यस्य अन्तर्गतम् अस्मिन् उपक्रमे भागं ग्रहणाय आदेशात् यूनः आमन्त्रयति। पञ्जीकरणस्य अन्तिमा तिथिः अस्यैव मासस्य अष्टादश दिनाङ्कः अस्ति। ebsb.aicte- india.org अन्तर्जाल-पटलेन पञ्जीकरणं कर्तुं शक्यते।

महिला-हाकी-क्रीडा

महिला-हाकी-क्रीडायां, हैदराबाद्-नगरे इटली-देशम् एकं शून्यं इत्यनेन अङ्केन पराजित्य, भारतं षड्विंशत्यधिक द्विसहस्रतम वर्षस्य एफ्.आई. एच्. हाकी-विश्वकप्-क्वालिफायर इत्यस्य निर्णायक-स्पर्धायां प्रविष्टम्। भारतस्य मनीषा चौहान् इत्येषा चत्वारिंशत्तमे निमेषे विजयी गोलं कृतवती। सलीमा टेटे इत्यस्याः नेतृत्वे भारतम् अद्य सायं सार्द्ध सप्तवादने अन्तिमक्रीडायां इंग्लैंड-दलं सम्मुखी करिष्यति।

।। इति वार्ता:।।